NCERT Solutions for Class 10 Sanskrit (Bhav): Chapter 8-प्रत्यया :

IndCareer
Schools

indCareer indCareer indCareer

# NCERT Solutions for Class 10 Sanskrit (Bhav): Chapter 8-प्रत्यया:

Class 10: Sanskrit (Bhav) Chapter 8 solutions. Complete Class 10 Sanskrit (Bhav) Chapter 8 Notes.

## NCERT Solutions for Class 10 Sanskrit (Bhav): Chapter 8-प्रत्यया:

NCERT 10th Sanskrit (Bhav) Chapter 8, class 10 Sanskrit (Bhav) Chapter 8 solutions

अभ्यासः (पृष्ठ 60)

**1.** शतृप्रत्ययं योजयित्वा वाक्यपूर्तिं कुरूत

(i) धावन्तः धावकाः यशः प्राप्नुवन्ति। (धाव्शत)

(ii) वस्त्राणि नयन् रजकः श्रान्तः भवति। (नी+शत)

(iii) जलं पिबन्तौ तृषार्तौ सन्तुष्टौ स्तः। (पिब्+शतृ)

(iv) कथां शृण्वन्ती महिला शिशुं शाययति। (श्रुशतृ)

(v) कार्यं कुर्वन्त्यः स्त्रियः गीतं गायन्ति। (कृ+शतृ)

**2.** शानच्प्रत्ययं योजयित्वा वाक्यपूर्तिं कुरूत

(i) गुरुं सेव्+शानच् सेवमानाः छात्राः सफलतां लभन्ते।

(ii) कष्टं सह + शानच् सहमानाः जनाः दुःखिनः भवन्ति।

(ii) सत्यं ब्रू+शानच् ब्रुवाणाः नराः सम्मानं प्राप्नुवन्ति।

(iv) तस्य वृध्+शानच् वर्धमाना प्रगतिः पितरं हृष्यति।

(v) मुद्+शानच् मोदमाना बालिका नृत्यति।

**3.** अधोलिखितवाक्येषु रेखाङ्कितपदस्य शुद्धमुत्तर प्रदत्तेभ्यः विकल्पेभ्यः चित्वा लिखत

**(क)** कथां श्रु **+** शतृ महिलाः ज्ञानं लभन्ते।

शृण्वन्

शृण्वन्ती

शृण्वन्त्यः

**(ख)** गम् **+** शतृ बालिके चिन्तयतः।

गच्छन्ती

गच्छन्त्यौ

गच्छन्तौ

**(ग)** वद् **+** शतृ बालकम् आकारय।

वदन्

वदन्तौ

वदन्तम्

**(घ)** धाव् **+** शतृ क्रीडकेन पथिक**:** आहतः।

धावन्

धावन्तम्

धावता

**(ङ)** श्रान्तः भू **+** शतृ अरुणः स्वपिति।

भवन्

भवन्तौ

भवन्तः

उत्तराणि-

(क) शृण्वन्त्यः

(ख) गच्छन्त्यौ

(ग) वदन्तम्

(घ) धावता

(ङ) भवन्

अभ्यासः **(**पृष्ठ **62-63)**

1. रिक्तस्थानानि पूरयत

(i) रामेण पाठः लेखितव्यः। (लिख्+तव्यत्)

(ii) लतया पुष्पाणि न त्रोटितव्यानि। (त्रुट+तव्यत्)

(iii) त्वया जलं वृथा न कर्त्तव्यम्। (कृ+तव्यत्)

(iv) त्वया उच्चैः न वदितव्यम्। (वद्+तव्यत्)

(v) अस्माभिः बहिः भ्रमितव्यम्। (भ्रम्+तव्यत्)

(vi) सर्वैः सत्यं वदितव्यम्। (वद्+तव्यत्)

(vii) युष्माभिः सन्तुलितभोजनम् एव खादितव्यम्। (खाद्+तव्यत्)

(viii) अमितेन अवश्यमेव तत्र गन्तव्यम्। (गम्+तव्यत्)

(ix) नकुलेन पाठाः पठितव्याः । (पठ्+तव्यत्)

(x) तैः धर्मः पालयितव्यः। (पाल्+तव्यत्)

**2.** कोष्ठकप्रदत्तशब्दैः सह उचितां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत

(i) मया एतत् कार्यं कर्त्तव्यम्। (अस्मद्)

(ii) त्वया खगाः रक्षणीयाः। (युष्मद)

(iii) नमितेन पाठाः पठितव्याः । (नमित)

(iv) सर्वैः अनुशासनं पालयितव्यम्। (सर्व)

(v) सैनिकैः देशरक्षा कर्तव्या। (सैनिक)

(vi) जनैः मधुरं वक्तव्यम्। (जन)

(vii) श्रमिकैः परिश्रमः कर्तव्यः। (श्रमिक)

(viii) अध्यापकेन नियमाः पालयितव्याः। (अध्यापक)

(ix) शिक्षकेन मनसा पाठयितव्यम्। (शिक्षक)

(x) तेन लेखौ लिखितव्यौ। (तत्)

**3.** कोष्ठकप्रदत्तशब्दैः सह उचितां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत

(i) न्यायाधीशेन न्यायः कर्त्तव्यः। (न्याय)

(ii) त्वया पौष्टिक भोजनम् खादितव्यम्। (पौष्टिक भोजन)

(iii) सर्वैः प्रातः भ्रमणम् कर्त्तव्यम्। (भ्रमण)

(iv) तेन कथाः पठितव्याः। (कथा)

(v) अस्माभिः पाठाः स्मर्तव्याः। (पाठ)

(vi) युष्माभिः सुचरितानि एव सेवितव्यानि। (सुचरित)

(vii) जनैः सुकार्याणि एव कर्त्तव्यानि। (सुकार्य)

(vii) छात्रैः प्रश्नाः प्रष्टव्याः। (प्रश्न)

(ix) बालैः जलम् न दूषयितव्यम्। (जल)

(x) युष्माभिः पुष्पाणि न त्रोटयितव्यानि। (पुष्प)

अभ्यासः **(पृष्ठ 64)**

**1.** अधोलिखितानि वाक्यानि पठित्वा 'अनीयर' प्रत्यययुक्तपदानि चित्वा समक्षं लिखत

पदानि — अनीयर

(i) अस्माभिः धर्मः आचरणीयः। — आचरणीयः

(ii) जनैः परिश्रमः करणीयः। — करणीयः

(iii) सर्वैः पर्यावरणस्य रक्षा करणीया। — करणीया

(iv) बालैः नियमाः पालनीयाः। — पालनीयाः

(v) त्वया एषः पाठः पठनीयः। — पठनीयः

(vi) सर्वैः समयस्य अनुपालनं कर्तव्यम्। — कर्तव्यम्

(vii) त्वया कदापि वृथा न वदनीयम्। — वदनीयम्

(viii) अनेन एतत् न करणीयम्। — करणीयम्

(ix) अस्माभिः दूषितं जलं न पानीयम्। — पानीयम्

(x) युष्माभिः पर्युषितम् अन्नं न खादनीयम्। — खादनीयम्

**2.** कोष्ठकप्रदत्तपदैः सह उचितां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत **(**पृष्ठ **65)**

(i) युष्माभिः प्रातः उत्थाय पठनीयम्। (पठ्+अनीयर्)

(ii) जनैः सर्वदा सर्वेषां कल्याणं करणीयम्। (कृ+अनीयर्)

(iii) अस्माभिः सुकार्याणि करणीयानि। (कृ+अनीयर्)

(iv) सर्वैः ईशवन्दना स्मरणीया। (स्मृ+अनीयर्)

(v) त्वया मधुराणि वचनानि वदनीयानि। (वद्+अनीयर्)

(vi) सैनिकैः दु:खं न गणनीयम्। (गण+अनीयर्)

(vii) अस्माभिः धर्मः आचरणीयः। (आ+ चर्+अनीयर्)

(vii) त्वया वृथा न वक्तव्यम्। (वच्+अनीयर्)

(ix) जनैः प्रातः जागरणीयम्। (जागृ+अनीयर्)

**3.** उदाहरणानुसारं लिखत **— (**पृष्ठ **66)**

| | पुल्लिङ्गे | | | स्त्रीलिङ्गे | | | नपुंसकलिङ्गे | | |
|---|---|---|---|---|---|---|---|---|---|
| शब्द | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| हसनीय- | हसनीय: | हसनीयौ | हसनीया: | हसनीया | हसनीये | हसनीया: | हसनीयम् | हसनीये | हसनीयानि |
| पठनीय- | पठनीय: | पठनीयौ | पठनीया: | पठनीया | पठनीये | पठनीया: | पठनीयम् | पठनीये | पठनीयानि |
| पानीय- | पानीय: | पानीयौ | पानीया: | पानीया | पानीये | पानीया: | पानीयम् | पानीये | पानीयानि |
| ग्रहणीय- | ग्रहणीय: | ग्रहणीयौ | ग्रहणीया: | ग्रहणीया | ग्रहणीये | ग्रहणीया: | ग्रहणीयम् | ग्रहणीये | ग्रहणीयानि |

NCERT Solutions for Class 10 Sanskrit (Bhav): Chapter 8-प्रत्यया:

अभ्यासः — (पृष्ठ **68)**

**1.** अधोलिखितवाक्येषु समुचितपदेन रिक्तस्थानपूर्ति कुरुत

(i) (बल + इन्) बलिनः जनाः निर्बलेषु बलप्रयोग न कुर्युः।

(ii) रथिनम् (रथ + इन्) जनम् वार्तायां मग्नं न कर्तव्यम्।

(iii) शिल्पिन्यः (शिल्प + इन्) बालिकाः कुत्र गताः?

(iv) दण्डिनि (दण्ड + इन्) जने न विश्वसिहि।

(v) (कर + इन्) करी वने वसति।

(vi) धनिनः (धन + इन्) गर्विताः न भवेयुः।

(vii) सीता अवदत् – अहम् कुशली (कुशल + इन्) अस्मि।

(viii) बलिनौ (बल + इन्) अपमानं न सहेते।

(ix) (गुण + इन्) गुणिना जनेन एतत् कार्यं सुष्ठु कृतम्।

(x) दण्डिनः (दण्ड + इन्) दण्डं धारयन्ति।

**2.** प्रदत्तशब्देषु मतुप् अथवा वतुप् प्रत्ययस्य यथापेक्षितं रूपं संयुज्य/वियुज्य लिखत

(i) बुद्धिमती (बुद्धि + मतुप्) नारी प्रशस्यते।

(ii) एतौ छात्रौ (शक्ति + मतुप्) शक्तिमानौ स्तः।

(iii) ताः कन्याः गुणवत्यः (गुण+ मतुप्) सन्ति।

(iv) लक्ष्मीवान् (लक्ष्मी + मतुप्) लक्ष्म्याः आदरं कुर्यात्।

(v) धनवन्तः (धन + वतुप्) जनाः दरिद्राणां सहायतां कुर्वन्तु।

(vi) सत्यवत्यै (सत्य + मतुप्) नार्थे पुस्तकं यच्छ।

(vii) (सत्य + वतुप्) सत्यवद्भिः जनैः सदा सत्यभाषणं क्रियते।

(vii) बलवता (बल + मतुप्) जनेन निर्बलेषु बलं न प्रयोक्तव्यम्।

(ix) (शक्ति + मतुप्) शक्तिमती नार्या इदं कार्यं कृतम्।

(x) गुणवद्भिः (गुण + मतुप्) छात्रैः ध्यानेन पठ्यते।

इदानीमस्याः तालिकायाः माध्यमेन अवगच्छामः **(पृष्ठ 70)**

लघु — लघुता लघुत्वम्

महत् — महत्ता महत्त्वम्

दीर्घ – दीर्घता दीर्घत्वम्

गुरु – गुरुता गुरुत्वम्

पवित्र – पवित्रता पवित्रत्वम्

छात्राः – तालिकां पूरयन्ति।

शिक्षकः – अधुना वाक्येषु एतयोः अभ्यासं कुर्मः।

**(पृष्ठ 70)**

अधः प्रदत्तवाक्येषु त्व/तल्-प्रत्ययस्य संयोजनं वियोजनं वा कृत्वा रिक्तस्थानानि पूरयत-

(i) कृष्णसुदाम्नोः मित्रता (मित्र + तल्) विश्वप्रसिद्धा।

(ii) विद्वत्वम् (विद्वस् + त्व) च नृपत्वम् (नृप + त्व) च नैव तुल्यम्।

(iii) कार्येषु दीर्घसूत्रता (दीर्घसूत्र + तल्) कदापि न कर्तव्या।

(iv) आकारस्य (लघु + त्व) लघुत्वम् कार्यबाधकः न भवेत्।

(v) पशवः स्वपशुत्वम् (स्वपशु + त्व) तु दर्शयन्ति एव।

(vi) वेदानां (महत् + त्व) महत्त्वम् को न जानाति।

(vii) गङ्गायाः पवित्रता (पवित्र + तल्) जगत्प्रसिद्धा।

(viii) मूर्खः स्वमूर्खतां (स्वमूर्ख + तल्) सभायां न प्रदर्शयेत्।

(ix) नदीनां (दीर्घ + तल) दीर्घता चिन्तनात् परः विषयः।

(x) मित्रेण सह मित्रत्वम् (मित्र + त्व) कदापि न त्याज्यम्।

अभ्यासः — **(पृष्ठ 72)**

**1.** अधोलिखितेषु कोष्ठकप्रदत्तशब्दैः सह 'ठक्' प्रत्ययस्य प्रयोगं कृत्वा रिक्तस्थानानि पूरयत

(i) धार्मिकाः (धर्म + ठक्) जनाः धर्मम् एव आचरन्ति।

(ii) अद्य वार्षिक: (वर्ष + ठक्) परीक्षापरिणामः प्राप्स्यते।

(iii) अद्य वयं ऐतिहासिकानि (इतिहास + ठक्) स्थलानि द्रष्टुं गच्छामः।

(iv) प्राथमिकी (प्रथम + ठक्) शिक्षा बाल्यतः एव भवति।

(v) सैनिकाः (सेना + ठक्) देशं रक्षन्ति।

(vi) अधुना आध्यात्मिकी (अध्यात्म + ठक्) शिक्षा अनिवार्या।

(vii) नागरिकाः (नगर + ठक्) एव देशम् उन्नयन्ति।

(viii) एताः वैज्ञानिकाः (विज्ञान + ठक्) चिन्तायां मग्नाः सन्ति।

**2.**'ठक्' प्रत्यययुक्तपदानि चित्वा लिखत

(i) भौतिकी उन्नतिरपि अनिवार्या। — भौतिकी

(ii) अधुना वार्षिक कार्य सम्पन्नम्। — वार्षिकं

(iii) सैनिकाः देशम् उन्नयन्ति। — सैनिकाः

(iv) दैविकी विपदा कष्ठकरी भवति। — दैविकी

(v) एषः सार्वभौमिकः सिद्धान्तोऽस्ति। — सार्वभौमिकः

(vi) सार्वकालिकाः उपदेशाः एते। — सार्वकालिकाः

(vii) सामाजिक कार्यम् एव एतत्। — सामाजिकं

(viii) वैज्ञानिकाः अन्वेषणे रताः भवन्ति। — वैज्ञानिकाः

(ix) भारतस्य भौगोलिकी स्थितिः सुन्दरा अस्ति। — भौगोलिकी

(x) एषा कवेः मौलिकी कृतिः। — मौलिकी

अभ्यासः **(पृष्ठ 74)**

**1.** शुद्धं विकल्पं चित्वा रिक्तस्थानानि पूरयत

(1) इयं छात्रा पठति। (छात्रः/छात्रा)

(ii) बालिकासु प्रथमा अध्ययनशीला अस्ति। (प्रथमः/प्रथमा)

(iii) शोभनानां भोजनानां दात्री भव। (दातृ/दात्री)

(iv) एषा तपस्विनी हवनं करोति। (तपस्वी/तपस्विनी)

(v) गङ्गा एका नदी अस्ति। (नद/नदी)

**2.** कोष्ठकप्रदत्तपदानां समुचितं प्रयोगं कुर्वन्तः/कुर्वन्त्यः रिक्तस्थानानि पूरयत

मञ्जूषा- श्रीमती, प्राध्यापिका, नदी, तपस्विन्या, नदीम्, प्रथमा, मातुलानी, बालिकाः, गच्छन्ती, मेधाविनी, छात्राः

(i) इयम् एका नदी अस्ति।

(ii) नदीम् परितः वृक्षाः सन्ति।

(iii) तपस्विन्या सह तस्य पुत्रः अपि प्रवचनं करोति।

(iv) एताः बालिकाः सन्ति।

(v) ताः सर्वाः छात्राः सन्ति।

(vi) प्रथमा वाचाला अस्ति।

(vii) ग्रामं गच्छन्ती श्रमिका श्रान्ता अस्ति।

(viii) एषा बालिका मेधाविनी अस्ति।

(ix) मम मातुलानी विदेशं गच्छति।

(x) श्रीमती रमा एका प्राध्यापिका अस्ति।

**3.** अधोलिखिते अनुच्छेदे रेखाङ्कितपदानि स्त्रीलिङ्गे परिवर्त्य अनुच्छेदं पुनः लिखत **(पृष्ठ 75)**

एक**:** बालकः ग्रामे वसति। सः विद्यालयं गच्छति। तेन सह तस्य भ्राता अपि गच्छति।

तस्य शिक्षकः तं प्रेम्णा पाठयति। विद्यालये अनेके छात्राः सन्ति। तेषु एकः अत्यधिक**:** मेधावी अस्ति।

एका बालिका ग्रामे वसति। सा विद्यालयं गच्छति।

तया सह तस्याः भ्राता अपि गच्छति।

तस्याः शिक्षिका ताम् प्रेम्णा पाठयति।

विद्यालये अनेकाः छात्राः सन्ति।

तासाम् एका अत्यधिका मेधाविनी अस्ति।

NCERT 10th Sanskrit (Bhav) Chapter 8, class 10 Sanskrit (Bhav) Chapter 8 solutions



IndCareer

# Chapterwise NCERT Solutions for Class 10 Sanskrit (Bhav) :


- Chapter 1-अपठितावबोधनम्
- Chapter 2-पत्रलेखनम्
- Chapter 3-अनुच्छेदलेखमन्
- Chapter 4-चित्रवर्णनम्
- Chapter 5-रचनानुवादः (वाक्यरचनाकौशलम्)
- Chapter 6-सन्धिः
- Chapter 7-समासा:
- chapter 8-प्रत्यया:
- Chapter 9-अव्ययानि
- Chapter 10-समय:
- Chapter 11-वाच्यम्
- Chapter 12-अशुद्धिसंशोधनाChapter 13-मिश्रिताभ्यासः
- Sanskrit : आदर्शप्रश्नपत्रम्

IndCareer

# About NCERT

The National Council of Educational Research and Training is an autonomous organization of the Government of India which was established in 1961 as a literary, scientific, and charitable Society under the Societies Registration Act. The major objectives of NCERT and its constituent units are to: undertake, promote and coordinate research in areas related to school education; prepare and publish model textbooks, supplementary material, newsletters, journals and develop educational kits, multimedia digital materials, etc.Organise pre-service and in-service training of teachers; develop and disseminate innovative educational techniques and practices;collaborate and network with state educational departments, universities, NGOs and other educational institutions; act as a clearing house for ideas and information in matters related to school education; and act as a nodal agency for achieving the goals of Universalisation of Elementary Education.In addition to research, development, training, extension, publication and dissemination activities, NCERT is an implementation agency for bilateral cultural exchange programmes with other countries in the field of school education.Its headquarters are located at Sri Aurobindo Marg in New Delhi. Visit the Official NCERT website to learn more.



IndCareer